त्रैलोक्यमङ्गलाख्यं कवचम्

११३८ प०३

सं० ११३८४
सनत्कुमारतन्त्रे
त्रैलोक्यमङ्गलनामं कवचम्
इन्द्राक्षी

पत्र सं

११३८

ॐ श्रीगणेशाय नमः पुलस्त्य उवाच भगवन्सर्वधर्मज्ञ कवचं यत्प्रकाशि
तं त्रैलोक्यमंगलं नाम कृपया कथय प्रभो १ सनत्कुमार उवाच शृणु वि
प्रेंद्र वक्ष्यामि कवचं परमाद्भुतं नारायणेन कथितं कृपया ब्रह्मणे पुरा २
ब्रह्मणा कथितं मह्यं नवत्स्नेहाद्वदामि तत् अतिगुह्यतरं तत्त्वं ब्रह्ममंत्रौघ
विग्रहं ३ यद्धृत्वा पठनाद्ब्रह्मा सृष्टिं वितनते ध्रुवं यद्धृत्वा पठनात्पाति
महालक्ष्मीर्जगत्त्रयं ४ पठनाद्धारणाच्छंभुः संहर्ता सर्वतत्त्ववित् त्रैलोक्य
जननी दुर्गा महिषादिमहासुरान् ५ वरदृप्तान् जघानैव पठनाद्धारणाद्य
तः एवमिंद्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः ६ शिष्याय विष्णुभक्ताय साधके
यत्प्रकाशयेत् शठाय परशिष्याय दत्वा मृत्युमवाप्नुयात् ७ त्रैलोक्यमंग
लस्यास्य कवचस्य प्रजापतिः ऋषिश्छंदश्च गायत्री देवो नारायणः स्वयं ८ राम १

धर्मार्थकाममोक्षेषुविनियोगःप्रकीर्तितः ॐप्रणवोमेशिरःपातुनमोना
रायणायच ८ भालंपायान्नेत्रयुग्ममष्टार्णोभुक्तिमुक्तिदः क्लींपायाच्छ्रो
त्रयुग्मंचैकाक्षरःसर्वमोहनः ९ क्लींकृष्णायसदाघ्राणंगोविंदायेतिजि
ह्विकां गोपीजनवल्लभायपातुस्वाहाननंमम १० अष्टादशाक्षरोमंत्रःकं
ठंपातुदशाक्षरः गोपीजनपदंवल्लभायस्वाहाभुजद्वयं ११ क्लींग्लौंक्लींश्या
मलांगायनमःस्कंधौदशाक्षरः क्लींकृष्णक्लींकरौपायात्क्लींकृष्णायगलं
मम १२ हृदयंभुवनेशायक्लींकृष्णायक्लौंमम गोपालायाग्निजायेतःकु
क्षियुग्मंसदावतु १३ क्लींकृष्णायसदापातुपार्श्वयुग्मममनुत्तमः कृष्णगोवि
दकौपातांस्मराद्येङेयुतौमनुः १४ अष्टाक्षरःपातुनाभिंकृष्णेतिद्व्यक्षरोवतु
पृष्ठंक्लींकृष्णकंकालंक्लींकृष्णायद्विठांतकः १५ सक्थिनीसततंपातुश्रींह्रीं

— क्लींकृष्णचहृदयं ज्ञानमुद्राक्षरः पायात्त्रयोदशाक्षरोवतु १६ ह्रींश्रींक्लींपद
२ तोगोपीजनवल्लभायपदं नमः स्वाहेपार्श्वेक्लींह्रींश्रींषोडशार्णकः १७ जा
2 नुनीचसदापातुह्रींश्रींक्लींचदशाक्षरः त्रयोदशाक्षरःपातुजंघेचक्राद्युता
युधः १८ अष्टादशाक्षरोह्रींश्रींपूर्वकोविंशवर्णकः सर्वांगंमेसदापातुद्वा
रकानायकोवली १९ नमोभगवतेपश्चात्वासुदेवायततःपरं तारायो
ह्यदशार्णोयंप्राच्यांमांसर्वदावतु २० ह्रींश्रींक्लींदशवर्णास्तुक्लींह्रींश्रींषोड
शाक्षरः गदाद्युक्तायुधोविष्णुर्मामग्नेर्दिशिरक्षतु २१ ह्रींश्रींदशाक्षरोमं
त्रोदक्षिणेमांसदावतु तारोनमोभगवतेरुक्मिणीवल्लभायच २२ स्वाहे
तिषोडशार्णोयंनैर्ऋत्यांदिशिरक्षतु क्लींहृषीकेशपदंनाथनमोमांवारुणो
वतु २३ अष्टादशार्णोकामंत्रोवायव्येमांसदावतु श्रींमायाकामकृष्णाय २

गोविंदायद्विरेगमनुः २४ द्वादशार्णात्मकोविद्याकृत्तरेमांसदावतु वाग्भवं।
कामकृष्णायह्रीं गोविंदायततः परं २५ श्रीगोपीजनवल्लभायस्वाहावलौ
ततः परं द्वाविंशत्यक्षरोमंत्रोईशान्येचसदावतु २६ कालीयस्यफणामध्ये
दिव्यंनृत्यंकरोतितं नमामिदेवकीपुत्रंनृत्यराजानमच्युतं २७ द्वात्रिंशदा
क्षरोमंत्रोप्यधोमांसर्वदावतु कामदेवायविद्महेपुष्पबाणायधीमहि त
न्नोनगः प्रचोदयात् गायत्रीकामदेवस्यसैषाउमांपातुचोर्द्धतः इतितेक
ब्र थितंविप्रब्रह्ममंत्रौघविग्रहं २८ त्रैलोक्यमंगलंनामकवचंब्रह्मरूपकं ब्र
ह्मेशप्रमुखाधीशानारायणमुखाच्छ्रुतं तवस्नेहान्मयाख्यातंप्रवक्तव्यंन
कस्यचित् गुरुंप्रणम्यविधिवत्कवचंप्रपठेत्ततः सकृद्द्विस्त्रिर्यथाज्ञानंसो
पिसर्वतपोमयः मंत्रेषुसकलेष्वेवदेशिकोनात्रसंशयः ३२ शतमष्टो।

मंत्रंचात्रपुरश्चर्याविधिस्ततः हवनादीन्दशांशेनकृत्वातत्साधयेद्ध्रुवं ३२
३ यदिस्यात्सिद्धकवचोविष्णुरेवभवेत्स्वयंसिद्धीमद्ध्यसततंलक्ष्मीवाणीवसे
न्मुखे ३३ पुष्पांजल्यष्टकंदत्वामूलेनैवपठेत्सकृत् दशवर्षसहस्राणां
3 पूजायाःफलमाप्नुयात् ३४ भूर्जेविलिख्यगुटिकांस्वर्णस्थांधारयेद्यदि
३५ कंठेवादक्षिणेबाहौसोपिविष्णुर्नसंशयः अश्वमेधसहस्राणिवाज
पेयशतानिच ३६ महादानानियान्येवप्रादक्षिण्यंभुवस्तथा कलांना
र्हंतितान्येवसकृदुच्चारणाद्यतः ३७ कवचस्यप्रसादेनजीवन्मुक्तोभवेन्न
रः पुत्रपौत्रसमायुक्तस्त्रैलोक्येविजयीभवेत् ३८ इदंकवचमज्ञात्वा
भजेद्यःपुरुषोत्तमं शतलक्षप्रजप्तोपिनमंत्रसिद्धिदायकः ३९ इतिश्री
सनत्कुमारतंत्रेत्रैलोक्यमंगलंनामकवचंसंपूर्णंसमाप्तम् शुभमस्तु ३